**अनूप** त्रि० अनुगता आपो यत्र ७ब० अच्समा० अतउत्त्वम्। जलप्राये स्थाने। "शकटः शाकिनी गावो जालमस्यन्दनं वनम्। अनूपं पशवो राजा दुर्भिक्षे नव वृत्तय" इति आह्नि० त०छागलेयः। तत्स्थले सर्व्वदावासिनि महिषे पु०। "बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः। देशोऽनूप इति ख्यात" इत्युक्ते "अनूपसर" इति प्रसिद्धे देशभेदे पु०। "अनूपराजस्य गुणैरनूनामिति" रघुः।

**अनूपज** न० अनूपे जलप्राये देशे जायते जन—ड ७त०। (आदा) इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात्तथात्वम्। तत्स्थानजातमात्रे त्रि०।

**अनूप्य** त्रि० अनूपदेशे भवः यत्। अनुगतजलदेशभवे "शन्न आपो धन्वन्याः शमनः सन्त्वनूप्या" इति स्नानमन्त्रः।

**अनूबन्ध्य** त्रि० अनु+बन्ध—ण्यत् उपस० दीर्घः। बधार्थं बन्धनीये यज्ञिये पशौ, "वशामनूबन्ध्यामालभेत" इति शत० २,४,४,१४, "अनुबन्ध्ययेष्ट्वेति" आश्व०। [याजार्थे।

**अनूयाज** पु० अनु+यज घञ् उपसर्गस्य वा दीर्घः। अनु-

**अनूरु** पु० न स्त ऊरू यस्य ब०। सूर्य्यसारथौ विनताज्येष्ठपुत्रे अरुणे। तस्य अपूर्ण एव गर्भे मात्रा अण्डस्य स्फोटनादूरुप्रभृत्यङ्गविकलत्वम् तत्कथा भा० आदिप०। यथा "ततः पुत्रार्थिनी देवी व्रीडिता च तपस्विनी। अण्डं बिभेद विनता तत्र पुत्रमपश्यत। पूर्व्वार्द्धकायसम्पन्नमितरेणाप्रकाशता। स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुतिः। योऽहमेवं कृतो मातस्त्वया लोभपरीतया। शरीरेणासमग्रेण तस्माद्दासी भविष्यसि। पञ्चवर्षशतान्यस्या यया विस्पर्द्धसे सह। एष च त्वां सुतो मातर्द्दासीत्वान्मोचयिष्यति। यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात्। न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम्। प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया। विशिष्टं बलमीप्सन्त्या पञ्चवर्षशतात्परः। एवं शप्त्वा ततः पुत्रो विनतामन्तरीक्षगः। अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा। आदित्यरथमध्यास्ते सारथ्यं समकल्पयदिति"। 'गतं तिरश्चीनमनूरुसारथेरिति" माघः। [तत्कथाऽनुपदमुक्ता।

**अनूरुसारथि** पु० अनूरुः सारथिः रथनियन्ता यस्य। सूर्य्ये

**अनूराध** त्रि० अनु+राध—घञ् उपस० दी०। अनुराधनीये "इन्द्रं वयमनूराधं हवामहे" इति अथ० १९,१५,२।

**अनूच** पु० नास्ति अभ्यस्ततया ऋक् यस्य अच् समासान्तः। ऋक्शून्ये अनुपनीते बालके। "अनृचबह्वृचावध्येतर्य्येवेति" सि०कौ०। "यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः" मनुः। 'अनृचः अनधीयान इति" कुल्लू०। "अनृचो माणवक इति" मुग्धबोधम्। समासान्तविधेरनित्यत्वात् क्वचित् न अच्। "तेन सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते इति" "तथानृचे हविर्दत्त्वा न दाता लभते फलमिति" च मनुः। समासान्तपक्षे अनृचे इति विवक्षया सप्तमी, तदभावपक्षे चतुर्थीति भेदः। अध्येतरीत्युक्तेः "अनृक् सामेति" सि०कौ०। अजभावपक्षे विभाषया कप्। अनृचकः ऋक्शून्ये त्रि०।

**अनृजु** त्रि० न ऋजुः। शठे वक्रे कुटिले च। "न पाणिपाद चपलो न नेत्रचपलोऽनृजुः" इति मनुः। "या भ्रातुरग्रे अनृजोर्ऋणमिति" ऋ० ४,३,१३। "लग्नात् पापावृज्वनृजू व्ययार्थस्थौ यदा तदा। कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदेति" मुहूर्त्तचि०। ऋजुमार्गगामी पूर्व्वगतिः, अनृजुः वक्री पश्चाद्गतिरिति तदर्थः।

**अनृण** त्रि० न ऋणं यस्य। ऋणशून्ये। ऋणञ्च अवश्यदेयम् तच्च उत्तमर्णाय दातव्यत्वेन स्वीकृतं धनम्। तच्चावश्यं शोध्यं तदशोधने "ऋणानामनपक्रियेत्युक्तेरुपपातकं भवति। अवश्यशोध्यत्वेन तत्सदृशम् वेदाध्ययनादिकमपि ऋणशब्देन व्यवह्रियते 'जायमानो वै पुरुषस्त्रिभिर्ऋणैर्ऋणी भवति स्वाध्यायेन ऋषिभ्यः, यज्ञेन देवेभ्यः प्रजया पितृभ्य" इति श्रुतिः एवञ्च वेदाध्ययनादिना ऋष्यादीनामृणशोधने अनृणो भवतीति स्मृत्यादौ प्रसिद्धम्। एवञ्च "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति" ऋणशून्यस्यैव मोक्षाधिकारः। अतएव मनुना "दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विज" इति अनृणस्यैव संन्यासोऽभिहितः। "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हतीति" मनुः। "एष वा अनृणः यः पुत्रीति" श्रुतिः। कृतोपकारस्य प्रत्युपकारोऽपि ऋणत्वेन स्वीक्रियते। तदभिप्रायेणैव "प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्त्तिभिरिति" रघौ वर्णितम्।

**अनृणिन्** त्रि० न ऋणी स्त्रियां ङीप्। ऋणिभिन्ने "दिवसस्याष्टमे भागे शाकं पचति यो नरः। अनृणी चाप्रवासी च स वारिचर! मोदते, इति भा०व०प०। "एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेदिति" पु०।

**अनृत** न० न ऋतम्। सत्यभिन्ने मिथ्याभूते। "यद्वाहमभिदुद्रोह यद्वा शेप उतानृतमिति" ऋ० १,२३,२२। "प्रियञ्च